शिष्यात्· शिष्याम्· शासतु· शाधि· ॥ हिपि सस्यतः सिपिवा· अशात्· अशिष्टां· अशासुः· अशाः अशात्· अशाद्· शशास· शशासतुः शिष्यात्· शासिता· ॥ ० पुष्यादित्वान्ङः केचित्· अशिष्यत्· ॥ चकासृ दीप्तौ· ॥ चकास्ति· चकास्तः चकासति· चकास्यात्· चकास्तु· चकास्ताम्· चकासतु· ॥ जौस लोपः चकाधि· अचकात्· अचकास्ताम्· ॥ अचकासुः अचकाः अचकात्· अचकाद्· चकासांचकार चकासामास· चकासांबभूव· अचकासीत्· ॥ इति परस्मै· ॥ वसि छादने अन्त्याबाधि· ॥ स्कोराद्योश्च· ॥ संयोगाद्योः सकारककारयोर्लोपो भवति झले पदान्ते च· ॥ वस्ते· वसाते· वसते· वस्से· वसाथे· वद्ध्वे· वसे· वस्वहे·

२९

नृसिंह भजे·

चक्ष्महे· चक्षीत· चक्षाम् अचक्ष·

चक्षिङः॥ न पिख्याञ्‌ अकशी जौ तु वा ॥ अनपि ॥ चख्यौ · चख्युः · चख्यिथ · चचक्षे · ख्यायात् ·

ख्येयात् · ख्यासिष्ट · ख्याता २ अख्यत् इति वन्ति ख्यादेर्न्याङः अख्यत ॥ केचिद्वदंति

पूर्वा आदित्वात् ॥ क्शाऽपि ॥ चक्शौ · क्शायात् · क्शेयात् · क्शाता २ अक्शासीत् ॥ ईड स्तु

तौ ॥ ईट्टे · ईडाते ईडते ॥ ईडि शाजनिभ्यः सध्वेशोरिट् ॥ एभ्यः सध्वयोरिड्भवति ॥

ईडिष्ये · ईडाथे · ईडिध्वे · ईडे · ईड्वहे · ईड्महे · ईडीत · ईडाम् · ईडिष्व · ईडिध्वम् · ऐट्टः

ऐडाताम् · ईडांचक्रे · ऐडिष्ट ॥ ईश ऐश्वर्ये · ईष्टे · ईशिषे · ईशिध्वे ॥ ध्वे च स लो

पः भ्रमार्थः ईशांचक्रे · ऐशिष्ट ॥ आस उपवेशने ॥ आस्ते · आसते · आ

धे॰॥ धेचस्तलोपः॰ स्याद्भूम्॰ स्यामासाचक्रे॰ स्यासिष्ठ॰ वसस्याच्छादने॥ वस्ते॰ वसाते॰ व
सते॰ वसीत॰ वस्ताम्॰ अवस्त॰ ववसे॰ अवसिष्ठ॰॥ षूङ् प्राणिगर्भविमोचने॰॥
सूते सुवीत॰ सूतां॥ सुवानगुणश्चतुर्षु॰॥ सुवे॰ सुवावहे॰ सुवामहे॰॥ असूत॰
सुषुवे॥ असवोस्विरइतोयुवो॰ सविषिष्ठ सोषिष्ठ॰ सविता सोता॰ असविष्ठ॰ असो
ष्ठ॰॥ शीङ् स्वप्ने॥ शीङो विषये सर्वत्र गुणः॥ शेते॰ शयाते॥ शीङो अन्तो रुट्॥ शीङ॰
र्थस्यान्तोनुड्भवत्यन्तोऽत्॥ शेरते॰ शयीत॰ शेताम्॰ अशेत॰ शिश्ये॰ अशयिष्ठ॰॥
इङ्॰ अध्ययने॥ अध्ययनार्थस्याधिपूर्वः॰ अधीते॰ अधीयाते॰ अधीयते॰ अधी
यीत॰ अधीताम्॰ अध्यैत॰ अध्यैताम्॰॥ इङोगाङ्लिटि॥ अधिजगे॰॥ अध्येषी

पा॰ ८

.सिंह भजे·

भर

ढः ॥ इको यणि लुङ् लङो गुणाभावश्च ॥ अधुक्षत· अधोक्ष्यत· अधुगीढ्व·
अधोक्ष्येढ ॥ ॐ ॥ इत्यात ॐ ॥ दिह उपचये ॥ अकार उपपदार्थः देग्धि· दिग्धे·
देह्य· दिह्याम· दोहौ दिहि· अदेहत् अदेहः अदिह्याम· अदिहन् ॥ अदिग्धः अदिह·
दिदिहव· दिदिहे· धिक्षीष्ट· अदिक्षत· अदिक्षत ॥ दुह प्रपूरणे ॥ दोग्धि· दुग्धः· दुहन्ति·
धोक्षि· दुग्धः· दुग्ध· दोह्मि· दुह्वः· दुह्मः· दुग्धे· दुहाते· दुहते· दुह्यात· दुहित· दोग्धु ॥
मस्माद्धिहे· ॥ मसान्दुकारान्तपरस्य हेर्धि भवति ॥ दुग्धि· अधोक· अधोग ॥ दुदो
ह· दुदुहे· धुक्षीष्ट· अधुक्षत· अधुक्षात· अदुग्ध· अधुक्षाताम· अधुक्षत· अदुग्धाः
अधुक्षथाः अधुक्षाथाम· अदुग्ध्वम· अधुक्षध्वम· अधुक्षि· अदुह्वहि· अदुह्म

धर

भ ५

द्वा ३

दुहिं भजे ॥

अधुक्षावहि अधुक्षामहि ॥ दिह उपचये ॥ उपचयो वृद्धिस्तस्मिन् ॥ देग्धि वदूपम् ॥
लिह आस्वादने ॥ लेढि लिढे ॥ ष्टुञ् स्तुतौ ॥ स्तौति स्तवीति तुष्टाव तुष्टुवे ॥
अस्तावीत् ॥ ब्रूञ् व्यक्तायां वाचि ॥ ब्रवीमि ब्रूमि ॥ ब्रुवः परस्य ईडागमो भवति

२१

वादौ विषये पिति परे ॥ ब्रवीति ब्रूतः ब्रुवन्ति ॥ ब्रुव आहश्च पंचानां ब्रुवः परेषां
तिवादीनां पंचानां णलादयः पंचादेशा भवंति चपुनः ब्रुव आह आदेशश्च ॥ आह
आहतुः आहुः ॥ तथ ॥ आहो हस्य तो भवति थे परे ॥ आत्थ आहथुः ॥ ब्रूथ ब्रवीमि
ब्रूवः ब्रूमः ब्रूते ब्रूयात् ब्रुवीत ब्रवीतु ब्रूतात् ब्रूहि ब्रूताम् अब्रवीत् ॥ अब्रूत ॥
ब्रूञो नेपिवच्यन्तव्यः ॥ उवाच ऊचे ॥ ॥ इत्यदादयः ॥ ॥ जुहोत्यादयः ॥

इसिंहभजे ॥

श्लादेर्द्वित्वं ॥ हु इत्यादेर्गणादुत्पन्नप्रत्ययस्यापो लुग्भवति । धातोश्च द्वित्वम् ॥ जुहोति ।
जुहुतः ॥ द्वेः द्वित्वान्तात्परस्यान्तो अद्भवति ॥ जुह्वति । जुहोषि । जुहुथः । जुहुथ । जुहोमि
जुहुवः । जुहुमः । जुहुयात् । जुहोतु । जुहुताम् । जुह्वतु ॥ हो हेर्धिः ॥ जुहुधि । अजुहोत् ।
श्चने उस् ॥ द्वित्वान्तात्परस्यान उस् भवति ॥ गुणश्च अजुहवुः । जुहाव ॥ भी ह्री भृ हुवा
मान्वास लुग्वत् ॥ जुहवाञ्चकार ॥ जुहवाम्बास । जुहवाम्बभूव ॥ जुहाव । हूयात् ।
अहौषीत् ॥ ञिभी भये ॥ बिभेति । क्ङिति से भीहकारिह्न ॥ बिभितः । बिभीतः । बिभ्यति ॥
अबिभयुः ॥ बिभयाञ्चकार । बिभयामास । बिभयाम्बभूव । बिभाय ॥ ह्रील ज्जायाम् जि
ह्रेति । जिह्रीतः । जिह्रियति । अजिह्रयुः । जिह्रयाञ्चकार । जिह्रयामास । जिह्रयाम्बभूव ।

२७

जिक्राय॰ अप्रैहृ भ्रोत॰ ॥पृपालनपूरणयोः॥ ओष्ठ्यादिः पूर्वस्य॰ ॥ ओष्ठ्य पूर्वस्य उर्भवति॰ उ
किरति॰ ॥ पिपर्त्ति॰ पोपुरू॰ ॥पवर्गादुत्तरस्य ऋकारस्योर्भवति॰ ॥ किति च परे॰ ॥ पिपूर्त्तः
पिपूरति॰ ॥ पिपर्षि॰ पिपूर्थः पिपूर्थ॰ पिपर्म्मि॰ पिपूर्यात॰ अपिपः अपिपरुः ॥ पपार॰
पपरतुः पपरिथ॰ पूर्य्यात॰ परिता॰ परीता॰ अपारित॰ ॥पृपालनपूरणयोः॥ पिपर्त्ति॰
पिपृतः पिप्रति॰ पिपृयात॰ पिपर्त्तु॰ पिपृतु॰ पिपृहि॰ पपर्थ॰ प्रियात॰ परिष्यति॰ अपा
र्षीत॰ ॥ओहाक्त्यागे॥ जहाति॰ ॥ हुश्नुवोः॥ हुश्नुक स्य धातोरातो लोपो भवति॰ स्वरपरे॰ ङिति३
ईकारस्च ङिति हसे॰ ॥ जहितः जहीतः जहति॰ ॥ जहातेर्यादावालोपः॥ जह्यात॰ ॥
इर्वा हौ॰ ॥ जहातेराकारस्य इकार ईकारश्च वा॰ ॥ जहिहि जहीहि॰ जहाहि॰ जहौ॰ ॥ इ

३२

३२

त्विक्षते हेयात् अहासीत् ॥ ओहाङ् गतौ ॥ इयर्ति इयृतः इयृति इयृयात् इयर्तु ।
ऐयृः । ऐयृताम् ऐयरुः आर आर्षीत् । ९ भादित्वान्नः ॥ इति पम ॥ ओहाङ्
गतौ ॥ भृञामित् ॥ हाङ् माङ् भृञां धातूनां पूर्वस्याकारस्येकारो भवति
श्लुकि सति ॥ हाङ् माङ् भृञामिति कथ्यनेन हाङ् मां गतौ ॥ माङ् माने ॥ डुभृञ् धा
रणपोषणयोरिह ग्रहणं भवति ॥ जिहीते जिहाते जिहते जहे अहास्त ॥ माङ् मा
ने ॥ मिमीते ममे अमास्त इत्यात् ॥ डुभृञ् धारणपोषणयोः ॥ बिभर्ति बिभृतः ।
बिभ्रति अबिभः बिभरांचकार बभार बभर्थ बिभ्रियात् भ्रीष्ट भर्त्ता २ भरिष्यति २
अभरिष्यत् २ अभार्षीत् अभृत ॥ ओहाक् त्यागे ॥ जहाति ॥ दादेः ॥ द्विरुक्तस्य दादेर्घो

३३

तोर्लोपोभवति॥ङि॥ति॥ दत्त॥ ददति॥ दत्ते॥ दांहो॥ दाहेराकारस्येत्वंभवति ङे परे॥ देहि॥
अदद्यात्॥ देहि॥ देयात्॥ दासीष्ठ॥ दाधास्याभितेसे ङि त्वमाति॥ अदित॥ अदिमातास्॥
दुधाञ्धारणपोषणयोः॥ दधाति॥ पूर्वस्य ङि तिमसे थः॥ मभान्तस्य दधातेः पूर्व
स्यधकारादेशोभवति ङि तिमसे परे॥ धत्तः॥ दधति॥ धत्ते॥ धेहि॥ धत्ताम्॥ धेयात्॥
अधित॥ णिजिरशौचपोषणयोः॥ निजांगुणः॥ निजविजविषांपूर्वस्यगुणोभवति॥
लुकि॥ नेनेक्ति॥ नेनिक्तः॥ नेनिजति॥ नेनेक्षि॥ नेनिक्ते॥ नेनिग्धि॥ डुः स्वरेऽपिनोप
धायागुणः॥ द्विरुक्तस्यधातोरपिविषयेस्वरे परे उपधायागुणोनभवति॥ नेनिजा
नि॥ अनेनेक्॥ अनेनेग्॥ निनेज॥ निनिजे॥ निक्षीष्ट॥ अनिजत्॥ अनैक्षीत्॥ अनैक्ताम्॥

३३

अशात्। अशासीत्॥ छो छेदने॥ छ्यति। चच्छौ। छायात्। अच्छात्। अच्छासीत्।
षोऽन्तकर्मणि॥ मरणम्॥ स्यति। ससौ। सेयात्। असात्। असासीत्॥ दोऽवखंड
ने॥ द्यति। ददौ। देयात्। अदात्॥ व्यध ताडने॥ संप्रसारणञ्च॥ विध्यति। विव्या
ध। विविधतुः। विव्यधिथ। विव्यद्ध॥ विध्यात्। अव्यात्सीत्। अव्याद्धाम्॥ श्लिष आ
लिङ्गने॥ श्लिष्यति। शिश्लेष। अश्लिक्षत्॥ तृप प्रीणने॥ प्रीणनं तृप्तीकरण
मित्यर्थः॥ तृप्यति। ततर्प। तर्प्ता। त्रप्ता। तर्पिता। अत्राप्सीत्। अतार्प्सीत्। पक्षेऽङ्॥
अतृपत्। अतर्पीत्॥ मुह वैचित्त्ये॥ मुह्यति। मुमोह॥ द्रुहादयः॥ मोढा। मोग्धा। मो
हिता। पुषादित्वात्॥ अमुहत्॥ णश अदर्शने॥ नश्यति। नेशतुः॥ मस्जिनशो

पू॰ ध्या ते॰ १

दीपि॰ अदीपि अदीपिष्ठ॰॥ पूरी आप्यायने॥ आप्यायनं पूर्यते॰ पुपूरे॰ अपूरि॰ अपू
रिष्ठ॰॥ पद् गतौ॥ पद्यते॰ पेदे॰। पत्सीष्ट॰ पत्ता॰ अपादि॰ अपदिष्ट॰ अपत्सातां॥
बुध अवगमने॥ बुध्यते॰ बुबुधे॰ भुत्सीष्ट॰ बोद्धा॰ भोत्स्यते॰ अबोधि॰ अबुद्ध॰ अभु
त्सातां॥ युध्यते॰ युध्येत॰ युयुधे युत्सीष्ट॰ अयोत्सीत॰॥ विद सत्तायाम्॰ विद्यते॰

३५

अवित्त॰ अवित्सातां॥ अवित्सत॥ ॥ इत्यात्॰ ॥ णह बन्धने॥ नह्य
ति॰ नह्यते॰ ननाह॰ नेहतुः नेहिथ॰ ननद्ध॰ नेहे॰ नत्सीष्ट॰ नद्धा॰ अनात्सीत्॰ अनाद्धाम्

तिउ

॥ इति दिवादयः ॥ षुञ् अभिषवे॥ स्वादिभ्यः श्नुः स्वादेर्गणात् श्नुः प्रत्ययो भवति च
तुर्षु परतः॥ अपो ऽपवादः॥ श्नुः श्नुप्रत्ययस्य ऽप्रत्ययस्य च गुणो भवति॥ सुनो
ति॰ सुनुते॰॥ श्नोर्वमोर्वा लोपः॥ संयोगपूर्वस्य श्नुप्रत्ययस्य ऽप्रत्ययस्योकारस्य लो

अ॰१

३५

नृसिंहं भजे ॥

३६

वैडाति ॥ वरिषीष्ट · वृषीष्ट · वरीषीष्ट · वरिता · वरीता · वरिष्यति · वरीष्यति · वरिष्यते · वरी
ष्यते · अवारीत् ॥ साविड्हीवौ न पे अवरिष्ट · अवरीष्ट · केचन · अवृत ॥ चिञ् चयने ॥
चिनोति · चिनुते · चिनुयात् · चिन्वीत · चिनोतु · चिनु ॥ चिनोतेः ॥ सपरोस्सयोः किल्वा ॥
अनयोः परयोश्चिनोतेः किल्वं वा भवति ॥ चिकाय · चिचाय चिक्ये · चिच्ये · चीया
त् · चेषिष्ट · अचैषीत · अचेष्ट ॥ धूञ् कंपने ॥ स्तृञ् आच्छादने ॥ स्तृणोति · स्तृणुते ·
तस्तार ॥ ० ॥ इत्यादि ॥ ० ॥ अशू व्याप्तौ ॥ अश्नुते ॥ इह भ्रमः प्रथमः तु पभव्यम् ॥
अश्नुवीत · आनशे · अशिषीष्ट · अशीष्ट · आशिष्ट · आष्ट · आशातांम् ॥ आप्लृ
व्याप्तौ ॥ आप्नुवन्ति · आप · आप्ता · आपत् ॥ शक्लृ शक्तौ ॥ शेकतुः शक्ष्यति · अशकत् ॥

सि छि २

३६

राधसाधसंसिध्यो॥ राधोहिंसायामेत्वपूर्वलोपौ किति लिटि सेटि थलि च रेधतुः रेधिथ अरात्सी
त्॥ ६ ॥ इति पचम्॥ इत्यादि त्वाद ग्र:॥ उषिर् स्वापवर्गे॥ उधादेर्नुम्॥ उधादेरीगणान्म्
त्ययो भवति कर्त्तरि चतुर्थ्यौ पोपयादः॥ उणादि॥ नमसोऽस्य॰ उष्ठः उन्धन्ति॥ अवो
भयपदं कथं चित्यं भव्यम्॥ उणात्सि उन्द्धः उन्ध्यात् अनुत अनुणः अनु ऊर्म्
अनुन्धन् अनुणः अनुणत्। अनुणद् उणोध उणोधिथ उउधे ऊत्तीय अयोत्सीत्
अनुधत् अनुद्धः॥ उच्छृदिर् दीप्तिदेवनयोः॥ छृणत्ति छृन्तः छृन्दन्ति छृन्ते॥ चछृ
र्द चछृदे छृत्तीय छर्द्दिषीय छृत्स्यति छर्द्दिष्यति छृत्स्यते अछर्द्दिष्यते॥ अ
छर्दीत् अच्छृदत् अछर्दिष्ट॥ उतृदिर् हिंसानादरयोः॥ तृणत्ति तृन्तः तृन्दन्ति

36

उत्तृहिर्दीप्तिदेवनयोः॥ तृं हेनम एत्वंपिति॥ तृणेढि॥ ढेपरे दस्यलोपः॥ ०॥०
इत्युभयपदिनः॥ ०॥ शिष्लृ विशेषणे॥ शिनष्टि॥ शिष्टः॥ शिनष्टु॥ अशिन
नट्॥ अशिनउ॥ शिशेष॥ शेष्टा॥ शेक्ष्यति॥ अशिषत्॥ ॥ छिदिर्
द्वैधीकरणे॥ छिनत्ति॥ छिन्ते॥ छेत्ता॥ भिदिर् विदारणे॥ भिनत्ति॥ भिन्ते॥ बि
भेद॥ बिभिदे॥ भेत्ता॥ हिसि हिंसायाम्॥ इदितः नमः॥ नमप्रत्ययस्य नस्य लोपाभव
ति॥ हिनस्ति॥ हिंस्तः॥ हिंसन्ति॥ हिनस्तु॥ हिंध्धि॥ अहिनः॥ जिहिंस॥ भञ्जो आमर्दने॥
भनक्ति॥ भङ्क्ष्यति॥ अभाङ्क्षीत्॥ भुज पालनाभ्यवहारयोः॥ भुनक्ति॥ भोक्ता॥
अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु॥ अनक्ति॥ आनञ्ज॥ अञ्जिता॥ अङ्क्ता॥ अ

३७

न

३८

पर्य्युपेभ्यः करोतेर्भूषणे सुट् ॥ संस्करोति ॥ अड्डित्वव्यवधानेपि सुट् ॥ समस्करोत् ॥ सञ्च
स्कार ॥ समसूद्धनस्यपञ्ज ॥ सञ्चस्करिथ ॥ एवं परिपूर्वकरूणोरूपम् ॥ ॐ ॥ इतितना
द्यः ॥ तुद व्यथने ॥ तुदादेः ॥ कर्त्तरि चतुर्थे ॥ तुदादिगणात् शः प्रत्ययो भवति ॥ कर्त्तरि चतु
र्थे ॥ = ॥ अत्र ॥ तुदति ॥ तुदतेः ॥ तुत्सीष्ट ॥ तोत्ता ॥ तोत्स्यति ॥ अतौत्सीत् ॥ अतौत्ताम् ॥ अतुत्त ॥ भ्र
स्जो पाके ॥ ग्रहिवेजवाइति सस्य जः ॥ केचित्सो जइत्याहुस्तन्मतेन्तरम् ॥ भृज्जति ॥ संप्रसा
रणे कृते ॥ भ्रस्जः सकाररेफयोरुपधायारम्वा ॥ बभर्ज ॥ बभ्रज्ज ॥ बभर्जतुः ॥ बभ्रज्जतुः ॥
बभ्रज्जिथ ॥ बभर्जिथ ॥ बभर्ष्ठ ॥ बभ्रष्ठ ॥ भृज्ज्यात् ॥ भक्षीष्ट ॥ अभ्राक्षीत् ॥ अभार्क्षीत् ॥ अ
भ्रष्ट ॥ अभर्ष्ट ॥ मुच्लृ मोचने ॥ मुचादेर्नुम् ॥ शप्रत्यये ॥ मुञ्चति ॥ मुच्यते ॥ मुक्षीष्ट ॥ अ
मुचत् ॥ अमुक्त ॥ लिप उपदेहे ॥ लिम्पति ॥ अलिपत् ॥ अलिप्त ॥ विद्लृ लाभे ॥ ॐ ॥

३८

दासिद्धं मजे ॥

विहन्ति ॥ लुञ् छेदने ॥ लुम्पति ॥ विचिर् क्षरणे ॥ सिञ्चति · सिषेच · असिचत् · अ
सिक्त · ॥ इत्यादयो ॥ ॥ कृती छेदने ॥ कृन्तति · कर्तिता · कर्तिष्यति · कर्त्स्यति · अक
र्तीत् · ॥ ओव्रश्चू छेदने ॥ वृश्चति · वव्रश्च · व्रश्चिता · व्रष्टा · अव्रश्चीत् · अव्राक्षी
त् ॥ ० ॥ कॄ विक्षेपे ॥ किरति · चकरतुः · कीर्यात् · करिता · करीता · अकारीत् ॥ उपात्किरते
श्छेदे सुट् ॥ उपस्किरति ॥ गॄ निगरणे ॥ गिरति ॥ गिरतेः रो लो वा ॥ गिलति · जगलतुः
अगारीत् ॥ स्पृश संस्पर्शने ॥ स्पृशति · पस्पर्श · स्प्रष्टा · स्पर्ष्टा · स्प्राक्षीत् · अस्प्राक्षीत् · अस्पृ
क्षत् · ॥ प्रच्छ ज्ञीप्सायाम् ॥ पृच्छति · पप्रच्छ कथं तर्हि पप्रच्छतुः पप्रच्छिथ · पप्रष्ठ · प
च्छ्यात् । प्रष्टा ॥ सृज विसर्गे ॥ सृजति · ससर्ज · ससर्जिथ · सस्रष्ठ · स्रष्टा · अस्राक्षीत्
टुमस्जो शुद्धौ ॥ मज्जति · ममज्ज · मंक्ता · मङ्क्ष्यति · अमाङ्क्षीत् · विछ गतौ ॥ विछायति ·

विछायांचकार॰ ॥ विविछ॰ विविच्छिंथ॰ विछ्यात्॰ विछायात्॰ अविछायीत्॰ अविच्छीत्॰
इषुइच्छायाम् ॥ इच्छति॰ ॥ ॐ ॥ इतिपम् ॥ ॐ ॥ मृङ्॰ प्राणत्यागे॰ ॥ अयकिच॰ ॥ ऋती
ङि॰ रिङादेशोभवत्यप्रत्ययेयकिचपरे॰ ॥ इयादेशे॰ म्रियते ॥ सपोःसपोःस्तादेशेम्रियतेःप
म्॰ ॥ ममार॰ ममर्थ॰ मृषीष्ट॰ मर्त्ता॰ मरिष्यति॰ अमृत ॥ दृङ्॰ आदरे ॥ आद्रियते॰ दद्रे॰ दृषीष्ट॰ अदृत॰ ओवि॰
जीभयसंचलनयोः ॥ विजते॰ विविजे ॥ विजः परेडादिप्रत्ययोङिद्भवत्येवः ॥ विजि
ष्यते॰ अविजिष्ट॰ ॥ ओलस्जीव्रीडे ॥ लज्जते॰ ललज्जे॰ अलज्जिष्ट॰ ॥ ॐ ॥ इ
त्यादितितुदादयः ॥ ॐ ॥ डुक्रीञ् द्रव्यविनिमये ॥ नाक्र्यादेः कर्त्तरिचतुर्थ ॥
अमन॰ क्रीणाति॰ ॥ ईहसे ॥ क्र्यादेर्गणात्परस्यनाप्रत्ययस्याकारस्यकारोभवति
ङि॰तिहसेपरे॰ ॥ नातः ॥ क्र्यादेर्गणात्परस्यनाप्रत्ययस्याकारस्यलोपोभवतिङि॰ति

ासेहं भजे ॥

स्वरे परे ॥ क्रीणीतः क्रीणन्ति । क्रीणीते । चिक्राय चिक्रयिथ चिक्रेय । क्रेषीष्ठ ।
अक्रेषीत् अक्रेष्ठ । पूञ् पवने ॥ धूञ् कंपने ॥ प्वादीनां ह्रस्वः ॥ चतुर्थी । पुनाति । अपा
वीत् ॥ कॄञ् हिंसायाम् ॥ कृणाति । चकरतुः अकारीत् ॥ ग्रह उपादाने ॥ गृह्णाति ।
गृह्णीते ॥ हसा शानहौ ॥ हसान्तात्क्र्यादिगणात्परस्य श्नः प्रत्ययशा भवति हौ परे ॥
नापवादः ॥ गृहाण । गृह्णीताम् । अगृह्णात् । अगृह्णाः । जग्राह । जगृहे । गृह्णा
त । ग्रहीषीष्ठ । अग्रहीष्ठ । अग्रहीष्ठ ॥ ० ॥ इत्यास्पे ॥ ० ॥ पुष पुष्टौ ॥ पुष्णा
ति । पुष्णीत । पुष्णन्ति । पुपोष । पोषिता । पोषिष्यति । अपोषीत् ॥ मुष स्तेये ॥
मुष्णाति । मुष्णीतः मुष्णन्ति । मुमोष । मोषिता । मोषिष्यति ॥ अमोषीत् ॥

39

शॄ हिंसायाम् ॥ शृणाति॰ शशरतुः अशारीत् ॥ ज्या वयोहानौ ॥ जिनाति॰ जिज्यौ॰ जिज्यतुः जिज्यिथ । जिज्याथ॰ जीयात्॰ अज्यासीत् ॥ ज्ञा अवबोधने ॥ जज्ञौ॰ ज्ञायात्॰ ज्ञेयात्॰ अज्ञासीत् ॥ कुष निःकर्षे ॥ कुष्णाति॰ कुष्णाण॰ चुकोष॰ अकोषीत् ॥ अश भोजने ॥ अश्नाति॰ आश अश्नात्॰ आश्नाः आशीत् ॥ ० ॥ इति पम् ॥ ० ॥ वृङ् संभक्तौ ॥ वृणीते॰ ववृ ॥ वृङ्॰ वृ॰ श्यां सिस्योर्वेट इति [?] ॥ वरिषिष्ट॰ वरीषीष्ट॰ वृषीष्ट॰ अवरिष्ट॰ अवरीष्ट॰ अवृत ॥ इत्यादि ॥ ० ॥ इति तनापत्यायान्ताः क्र्यादयः [?] ॥ ० ॥ चुर स्तेये ॥ चुरादेर्णिच् ॥ स्वार्थे चतुर्थी ॥ सधातुः ॥ चोरयति॰ चोरयाञ्चकार । चोर्यात् ॥ णिलाद्धुम प्रफस्म [?] ॥ चोरयते ॥ णेरङ्॰ ह्रस्व॰ अङि लघोर्ह्रस्व उपधायाः लघोर्दीर्घः ॥ अचूचुरत्॰ अचूचुरत ॥ चिति स्मृत्याम् ॥ चिन्तयति॰ चिन्तयते॰ अचिचिन्तत् अचिचिन्तत॰ अर्च पूजा

र्कसिंहं भजे॥

याम्॥ अर्चयति अर्चयते॥ स्वरादेः परः॥ स्वरादेर्धातोर्द्वितीयो अवयवोऽद्विरुक्तः स
स्वरो द्विर्भवति॥ न द्राः॥ संयोगादयो द्विर्न॥ आर्चिचत॥ गण संख्याने॥ अदन्तः गणय
ति गणयते॥ अग्लोपिनो नाङ्काल्यम्॥ अजगणत् अजगणत॥ कथ वाक्य
प्रबन्धे॥ अदन्तः कथयति कथयते अचकथत् अचकथत॥ ओलडि व्रीडे॥ लण्ड
यति ओलण्डयते ओदित्संज्ञकः केचिन्नेच्छन्त्योकारस्य॥ लिजि चित्रीकरणे॥
मुद हर्षे संसर्गे च। अपुवित्तसमुत्सर्गे॥ रूप रूपक्रियायाम्॥ वर्ण गावि चूर्णने॥ वर्ण
वर्णक्रियाविस्तारगुणवचनेषु पारतीरकर्मसमाप्तौ अर्थ उपयाच्ञायाम्। मिश्र सं
पर्के॥ चुद संचोदने॥ इद गतौ कंपने च। चर्च अध्ययने॥ मूत्र प्रस्रवणे॥ ० ॥ ० ॥
इत्युभयपदिनो णिजः प्रत्ययान्ताश्चुरादयः॥ ० ॥ धातोः प्रेरणे॥ धातोः प्रेरणप्रयोजक

२८

व्यापारेऽर्थे णिः प्रत्ययो भवति धातोश्च द्वित्वम् ॥ भवन्तं प्रेरयति भावयति भावयाञ्चकार ॥
अङ्सयोः पूर्वस्योकारस्येत्वं पवर्गयरलवजकारेष्ववर्णेषु परतः ॥ पवर्गयरलवेष्ववर्णेषु परतः ॥ पू
र्वस्येकारः ॥ अबिभवत् अमीमवत् अपीपवत् अयीयवत् अरीरवत् ॥ अलीलवत् कुर्वन्तं प्रेरयति ॥
कारयति ॥ कारयाञ्चकार ॥ अचीकरत् पाचयति अपीपचत् ॥ हनो वृत् ॥ हन्तेर्वधादेशो भव
ति ॥ इस्सवर्जिते णिति घातयति घातयाञ्चकार अजीघतत् ॥ शद्लृ शातने ॥ शातयति अशी
शतत् ॥ शदेरगतौ शातजौ ॥ गतौ तु शादयति ॥ रातो औ पुक् ॥ आ धातोरादन्तस्य च पुगाग
मो भवति ॥ ऋकि गुणः ॥ अर्पयति आर्पिपत् दापयति अदीदपत् धापयति अदीधपत्
स्थापयति ॥ तिष्ठतेरत्युपधाया इत् अतिष्ठिपत् ॥ पादैर्धौ क् ॥ पाशा छा सा ह्वेञ् व्येञ् वेञो
युक्जौ ॥ पाययति ॥ पिबतेरति पूर्वस्येकार उपधाया लोपश्च ॥ अपिप्यत् ॥ शो ॥ शाय

यति। अशीशयत्॥ छो॥ छाययति। अचिच्छयत्॥ व्यो। साययति। व्याययति॥ व्येतेर्डि संप्रसा
रणम्। युगभावो गुणश्च। अजूहवत्। व्याययति। अविव्ययत्। अवीवयत्॥ पातेर्णौ लुक्॥ पाते
र्धातोर्णौ परे लुगागमो भवति। पालयति॥ वो गन्धनयोः वापयति॥ वीजधं जोर्णौ॥ वी
र्णौ परे लुगागमो भवति। पालयति॥ वो गन्धनयोः वापयति॥ प्रयोजकात्स्मयतेरात्वम्॥ विस्मापयते। अ
णाययति। अपिप्रिणत्। धूनयति। अदूधुनत्॥ उपधाया अवर्णस्य डि अहृ॥ अ
सिस्रपत्। रोहयति॥ रुहेर्णौ पो वा। रोपयति। कल्पयति॥ उपधाया ऋवर्णस्यर्डि अहृ॥ अ
चिक्लृपत्। अचकल्पत्। अवीवृतत्। अववर्तत्। मार्जयति। अममार्जत्। अममार्जत्॥ इङो की
जीनामात्वं णौ॥ अध्यापयति। इङो डि गाङ् वा॥ अध्यजीगपत्॥ ह्रीप्रीनीकूस्मयीनां पुक्
णौ। ह्रेपयति। अजिह्रिपत्। अविव्रिपत्॥ रीङ् र स्मारो॥ अरीरिपत्॥ क्नूयीदृगिन्धे॥ आद्
त्वे च॥ यपयोर्वसे लोपः॥ क्रोपयति। अचुक्नुपयत्॥ स्मायी विधूनने॥ स्मापय

मि६
प्रि३

५१

तुर चेर

पयति · अचिस्मपत् ॥ नृतिः मारितः शासघ्नामुन्तेकार्यन्ने · ठौ कत्तौ रुगतौ ॥ कूहना-ठो
कयति · अतुठौकत् · अंचैत्रौकत् ॥ ऊँच पाख्यायाम् ॥ पाँयति · अपयाचत् ॥ शासु अनु
शिष्टौ ॥ अशशासत् ॥ इषवेक्कत्ये · इषे ... औरीर्वे: ॥ दूमयति · अदूदुमत् ॥ वृट
वेष्टाणाम् ॥ मितां ह्रस्वः धातुपाठे मित इत्येवं पठितानां धातूनां ह्रस्वो भवति णौ परे ॥
[illegible] । वेटयति · वटयते · अजीवटत् · व्यथयति · अंबुथते ॥ जनीजृष्क्नसुरञ्जोऽम
न्तो अमितः ॥ जनयति · अजीजनत् · जरयति · अजीजरत् · रञ्जयति ॥ चह परिकल्पने ॥
चहयति · अचीचहत् · शमयति · अशीशमत् · दमयति · अदीदमत् ॥ मारणतोषणनिशा
मनेषु ज्ञपमारणतोषणनिशामनेषु ॥ ज्ञपयति · अजीज्ञपत् · अन्यत्र ज्ञापयति · ज्वलह्व
लह्मलग्ला स्नावामितः ॥ ज्वलयति · ज्वालयति · ह्वलयति · ह्वायति · ह्मलयति · ह्मा

क्रमुकरणादीस्या ॥ क्रमयति · अचीक्रमत

ग्लहभजे·

लयति॥ ग्लपयति· ग्लापयति· स्नपयति· स्नापयति॥ अजिज्वलत्· अजीह्नसत्· अजीग्लपत्· असिस्नपत्॥ इणो जो वा गमिः॥ गमयति· अजीगमत्· अयपयति· आजिपत्॥ ॥ ॥

इति ईन्तप्रकरणम्॥ ॥ इच्छायामात्मनः॥ सः सान्तात्पूर्वविस्पदम्॥ धातोरिच्छायामर्थे सः प्रत्ययो भवति· धातोश्च द्वित्वम्॥ भवितुमिच्छति॥ बुभूषति· अबुभूषीत्· भावयितुमिच्छति बिभावयिषति· अबिभावयिषीत्॥ वुः से॥ उवर्णान्ताद्धवर्णान्ताच्च ग्रहिभ्यां च सस्य नेट्· नानि द्विसे॥ इडुर्जिते सप्रत्यये परे· गुणो न भवति॥ न स्ववनतरणयोः घुनात्सादिः सः कित्· सेटी वे· तितीर्षति॥ चिकीर्षति· चिचीषति· चिकीषति॥ जिगीषति· पुपूषति॥ यः सेः पन्तु॥ पिपक्षति· पिपासति· तिष्ठासति· तिस्यासति· मुमूर्षति· पुपूर्षति· वुवूर्षति· रुद विद मुष ग्रहि स्वपि प्रच्छः सः कित्॥ रुरुदिषति· विविदिषति· मुमुषिषति॥ ठः॥ कः॥ गस्य वर्गः॥ जिघत्सति॥ कृगृदृधृप्रच्छिभ्यः

(श्री:)

दि१ स्या२

(५२)

७२

सः [illegible] स्येट्॥ पिपृच्छिषति। सुषुप्सति। अनुजिघृक्षति॥ हनिङोः सोऽगितः॥ जिघांसति॥ इङः सेग
मवाच्यः॥ अधिजिगांसते॥ गमेः सस्येड्वा तु॥ जिगमिषति॥ इसे॥ अपिहाधारभलभशकपतप
दमिमीमामाङ्मेङां स्वरस्येस [illegible]॥ बलिपूर्वस्य लोपश्च॥ दित्सति। धित्सति॥ स्कोर्लोपः॥ मुत्सा
सानां चपाः स्वेसे॥ रिप्सते। लिप्सते। शिक्षति। पित्सति॥ अस्मेर(नायो)वा॥ अशेरिच्छायामधेऽना
यः प्रत्ययो भवति। द्विर्भावश्च। अशनायति। अशिशिषति॥ पततेनरादिभ्यः स्येड्वा॥ पित्स

तिद

ते॥ पिपतिषति। मित्सते। मित्सते॥ आप्नोतेरी॥ आप्नोतेरात ईर्भवति सेपरे॥ ईप्सति। तितनिषति।
तितंसति॥ तनेः सादो से वा दीर्घः॥ तितांसति। दिदरिद्रिषति। दिदरिद्रासति॥ दम्भीज्ञपिभ्यां सस्य
वेट्॥ दिदम्भिषति। जिज्ञपयिषति॥ ज्ञपेः स्वरस्य सादौ से ई भवति॥ पूर्वस्य लोपश्च दम्भेरिच्च। ध
पूर्वऽसान्तात्सादिः सः कित्॥ धिप्सति। धीप्सति॥ इवन्तऋधभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनिभ्यः
सस्येड्वा॥ दिदेविषति॥ वस्यानिटि से ऊः॥ दुद्यूषति। अर्दिधिषति॥ अधेरनिटि से स्वरस्य

७३

सपूर्वस्य लोपश्च ॥ ईत्सेति · विभ्राजिषति · विभ्रसति · विभ्रंसति · शिश्रयिषति · शिश्रीषति · सि
सिस्वरिषति · सुस्वूर्षति · दिधरिषति · युयूषति · ऊर्णुनविषति ॥ ऊर्णोतेरिड्वा ङित् ॥ ऊर्णुनुवि
षति · ऊर्णुनूषति ॥ बिभरिषति · बुभूर्षति · तुतूर्षति · सिषावयिषति ॥ स्तौतिण्यन्तयोरेव षेपूर्वा
द्विलः ॥ सस्य षः ॥ सिसनिषति · सिषासति · नो श्विदिस्विदिसहां ण्यन्तानाम् ॥ सिसाहयिषति ·
॥ इति सान्तप्रकरणम् ॥ ॥ अतिशये हसादेर्यङ् द्वि... च ॥ हसादेर्धातोरतिशये ऽर्थे य
ङ् प्रत्ययो भवति । तस्मिन्सति धातोर्द्विवचनम् ॥ यङि यङ्लुकि च पूर्वस्य गुणो भवति ॥ स धातुः
ङित्वादात्म ॥ अतिशये न पुनः पुनर्वा भवति ॥ बोभूयते · बोभूयाञ्चक्रे · अबोभूयिष्ट · बो
भुज्यते ॥ अनपि च हसात् ॥ हसादुत्तरस्य यङो लुग्भवत्यनपि विषये ॥ बोभुजाञ्चक्रे · बोभुजि
षीष्ट · अबोभुजिष्ट · मोमुह्यते · लेलिह्यते · जोहूयते · वेविद्यते ॥ आतः ॥ यङि यङ्लुकि च पूर्व
स्याकारस्याकारो भवति । पापच्यते · अपापचिष्ट · पापठ्यते ॥ स्वपसावचदीनां यङ् · स्वरादेः

य

परः नह राः संयोगादयो हन्ति। अश्वाय्यते। अशास्यते। उर्णोनूयते। गुणोर्त्ति। यकारपरे रेफस्य नहि। त्वनिषेधः॥ अराय्येते। जमजपनानुकः। जमान्तस्य धातोर्जपादीनां धातूनां च पूर्वस्य नुग्भवति। यङि यङ्लुकि च॥ यंगम्यते। वंभ्रम्यते॥ नुक्यदान्तवदनुस्वारः। अप्यनुस्वारः॥ छेयम्यते। छेय्यम्यते। चंक्रम्यते। तंतन्यते। जंजप्यते। यंयम्यते। दंदह्यते। दंदश्यते। बंभज्यते॥ पशवा बनगन्यनयोः॥ पंपश्यते॥ वलयान्तस्य वानुकः। मवस्योः॥ मंमव्यते। मामव्यते॥ चलगतेः॥ चंचल्यते। चाचल्यते। दंदह्यते। दादह्यते॥ चरफलोः परस्यात उत्पूर्वस्य नुक्॥ चंचूर्यते। पंफुल्यते। रीगृदुपधस्य॥ ऋदुपधस्य धातोः पूर्वस्य रीगागमो भवति॥ यङि यङ्लुकि च। नरीनृत्यते। रागेन। अत्वतो पिरिगित्विवाच्यम्॥ वरीवृ[illegible]ते। परिपृच्छ्यते स्वपिस्यमिव्येञां संप्रसारणम्। सोषुप्यते। सेसिम्यते। वेवीयते॥ स्वपिस्यमिव्येञां संप्रसारणम्॥ सोषुप्यते। सेसिम्यते। वेवीयते॥ वेसेन्नैसम्प्रसारणम्॥ वावश्यते। परस्त्रसुधंसुभ्रंसकसंचुंसपतस्कन्दां यङि यङ्लुकि च पूर्वं

फ

स्पनीक्नुः पनीपद्यते· मनीस्नस्यते· दनीध्वंसते· वनीवच्यते। चनी कैते· पनीपद्यते। चनीस्र
द्यते ॥ अतोरिः ॥ यङि ॥ चेक्रीयते· जेहीयते· वेव्रीयते· मम्रीयते ॥ हादेरिः ॥ अपिह्रा धा मो गेहाक
पिबतिसोमस्याभिकारो भवति· किञ्जिहते· देदीयते· देधीयते· मेमीयते· जेगीयते· जेहीयते· पे
पीयते· सेसीयते· तेष्ठीयते ॥ चायः कीः चेकीयते ॥ व्रो ध्योरीयङि। जेव्रीयते· देध्मीयते। ॥ह
न्तेर्हिंसायां घ्नी ॥ जेघ्नीयते· जंघन्यते ॥ गत्यर्थेभ्यः कौटिल्य एव यङ्। वञ्चं व्रजति· वाव्रज्यते·
लुपसदचरजपजभदहदशगृभ्यो धात्वर्थनिन्दायामेव यङ्· गर्हितं लुम्पति· लोलुप्यते। फव
तेर्यङि न वृत्वम्· कुङ् शब्दे ॥ कोकूयते ॥ ००० ॥ इति यङन्तप्रकरणम् ॥ ००० ॥ वान्यत्र ॥ उक्त
स्य यङ्स्यापो गं विना यङो लुग्भवति। तस्मिंस्तु किं सति पित्स्विड्वेट् ॥ बोभवीति· बोभोति· बोभू
तः बोभुवति ॥ अलु· गन्तास्मदादिवच्च ॥ बोभवाञ्चकार· अबोभवीत्· पापचीति· पापक्ति·

अपापक् १ वरिवर्ति ५

पापक्तः पापचति पापच्यात् अपापचीत् ६ अपापक्ताम् अपापचुः पापचांचकार पापचामास पापचांबभूव । अपापचीत् ॥ हेः स्वरेऽपिनो पधायागुणः ॥ बोभुजीति बोभोक्ति अबोभुजीत् बावदीति बावत्ति जाबंहिति जाबंढि ॥ आकान्तानाम् हुपधानां च यङ्लुकि गुर्वस्य नुक् रिक् रीकः ॥ चर्करीति चरीकर्ति चरीकरीति चर्कर्ति चरीकर्ति चर्कृतः चरीकृतः चरीकृतः चरीकर्ति वर्वृतीति वरीवृतीति वरीवृतीति वर्वर्ति वरीवर्ति वनीवचीति वनीवक्ति वनीवक्तः वनीवचति जंगमीति जंगन्ति जंगतः जंगमति ॥ मोनोधातोः ॥ धातो मस्य नो भवति वमयोः परतश्च जंगमीमि जंगन्मि जंगन्वः जंगन्मः जंघनीति जंघतः जंघ्नति जाहेति जाहाति जाहितः जाहति दाद्देति दादाति दात्तः दाद्दति जर्गधीति जरिगधीति जरीगधीति जर्गर्द्धि जरीगर्द्धि २ जरीगर्द्धः जरीगर्द्धः २ जरिगधति जरीगधति २

जंघन्ति ३

ञिरिकारो ॥ नाम्नो ञिः प्रत्ययो भवति · कारोऽर्थे · सचिञ्त्व वटं करोति · वटयति · महान्तं करोति · महयति ·
ना विद्वत्कार्यम् ॥ पृथुं करोति · प्रथयति · म्रदयति · द्रढयति · स्थवयति · द्रवयति · वरयति · कनय-
ति · ह्रसयति · क्षेपयति · प्रियं करोति · प्रापयति · गुरुं करोति · गरयति · स्थिरं स्थापयति · उढिं उ-
ढयति ॥ ञेर ... ञिः स्वरादेपाः · श्रुङि पूर्वटस्य जः · श्रोजढत् · कर्त्तुर्यङ् · उपमानात्कर्त्तुराचारोऽ-
र्थे यङ् प्रत्ययो भवति · श्येन इवाचरति · श्येनायते · काकः पण्डित इवाचरति पण्डितायते मूर्खः ·
यङि वा सलोपः ॥ पयायते · पयस्यते · अप्सरो ओजस सुमनसां नित्यम् ॥ अप्सरायते · ओजाय-
ते · सुमनायते · ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया मनसस्तु सुपूर्वस्य नित्यं लोपो विधीय-
ते ॥ नाम्न आचारे क्विब्वा ॥ कृष्ण इवाचरति कृष्णति · रामति · देवति ॥ आचारे उपमानात्
उपमानात्कर्त्तुराचारेऽर्थे यः प्रत्ययो भवति ॥ आचारेऽस्य चेकारः ॥ पुत्रमिवाचरति · पुत्रीयति
शिष्यमुपाध्यायः प्रासादीयति कुट्यां भिक्षुः ॥ भृशादिभ्योऽभूततद्भावे यङ् · एभ्योऽस्मिन्नर्थे यङ्

वसेकि·तिम्कसेचच्छोः स्तैयोवा·देदिवीति·देधूतः·वेविच्छीति·वेवेष्ठि·वेवीष्टः·दाधेति·दाधाति·धात्तुः
दाधति·॥ःः॥ इति यङ्लुक्प्रकरणम्·॥ नाम्नोर्थइचास्य·नाम्नइच्छायामर्थे यः प्रत्ययो भवति·॥
अपत्यस्येचकारः॥ आत्मनः पुत्रमिच्छति·पुत्रीयति·॥ क्वचिन्नस्वचयकारः गामिच्छति·गव्यति·नो
व्यति·त्वद्यति·मद्यति·युष्मद्यति·अस्मद्युति·॥ काम्य च·॥ पुत्रकाम्यति·॥ धनस्यचेकारः गध
नः यति·धनीयति·॥ उदकस्योदन्वा·॥ उदन्यति·उदकीयति·॥ नाम्नोयेसुगसुको·॥ नाम्नो यप्र
त्यये परे सुकसुगागमो भवतः॥ अश्ववृषयोर्मैथुनेच्छायाम्·॥ अश्वमिच्छति या·सा अश्वस्यति·
वृषमिच्छति·या सा वृषस्यति गौः·॥ क्षीरलवणयोर्लालसायाम्·॥ क्षीरमिच्छति यः स क्षीरस्यति बालः लव
णमिच्छति·लवणस्यति उष्ट्रः दधिस्य·दध्यस्य·॥ करणेच·नाम्नः करणेऽर्थे मः प्रत्ययो भवति·कण्डूयति·
नमस्यति·तपस्यति·वरिवस्यति·॥ शब्दादिभ्यो यङ्॥ करणे·शब्दायते·वैरायते·कलहायते·अभ्राय
ते·मेघायते·कष्टायते·॥ उष्मवाष्पधूमेभ्य उद्वमने·॥ उष्मायते·वाष्पायते·धूमाते·॥

ख५ ति६ ति३ ति२ ति३ ति३

दर्शितं भजे॥

प्रसयोभवति। अभ्रंशोभ्रंशोभवति भ्रशायते। क्विपि भ्रशायति। च्विर पि भ्रशीभवति। ॥ ॐ ॥ ॥
इति नामधातुप्रकरणम्॥ निविशादेः॥ न्यादिपूर्वकाद्विशादेर्धातोरात्मनेपदं भवति। निविशते। विपरा
भ्योजे॥ विजयते। पराजयते॥ समागमच्छिप्रच्छिस्वरत्यर्तिश्रुविदृशिभ्यः॥ अत्रात्। संगच्छते।
संपृच्छते। संस्वरते। समियते॥ अवः शब्दे च। कर्तरि चानुसृ॥ श्रुवर्णे॥ संशृणुते। संवि
त्ते॥ वेत्तेरन्तोवानुवृत्ति॥ संविद्रते। संविदते। संपश्यते॥ आङोदोऽनास्यविहरणे॥ आदत्ते।
अनास्यविहरणे किम्॥ व्याददातिमुखं विहग्राः॥ क्रीडोऽनुसंपरिभ्य[illegible]श्च॥ अनुक्रीडते। संक्री
डते। परिक्रीडते। आक्रीडते॥ शब्देतुन॥ संक्रीडतिरथचक्रम्॥ समवप्राणविभ्यः स्थः। संतिष्ठते।
अवतिष्ठते। प्रतिष्ठते। उपतिष्ठते विनिष्ठते। उपान्मंत्रकरणे मंत्रीकरणे देवपूजासंगमपथिषु।
ऐन्द्यागार्हपत्यमुपतिष्ठते। सन्तमुपतिष्ठते। विष्णुमुपतिष्ठते। गङ्गायमुनामुपतिष्ठते। अय
म्यन्यागङ्गामुपतिष्ठते॥ अकर्मकाच्च॥ ज्ञानमुपतिष्ठते। स्वाभिप्रायाविःकरणे नेत्राख्याया

संगच्छेतद्
डा५

(५८)

अत्र॰ गोपी कृष्णाय तिष्ठते॰ संशय्य कर्णादिषु तिष्ठते॰ ए:॥ आङः प्रतिज्ञायाम्॥ नित्यं शब्दमाति
ष्ठते॥ आङो यमहन्भ्यामस्वाङ्गकर्मणि॥ अकर्मकाभ्यां स्वाङ्गकर्मकाभ्यां च॰ आयच्छते॰
पाणिं वा॰ आहते शिरो वा॰ अन्यत्र परात्मानमायच्छति॰ आहन्ति वा॥ उद्विभ्यां तपः पूर्ववत्॥ उत्तपते॰ वि
तपते॰ पाणिमर्था॰ अन्यत्र महीं वितपत्यर्कः॥ उदश्चरस्सागे॥ धर्ममुच्चरति॰ अन्यत्र उच्चरति॰ सम
स्तृतीयायुक्तात्॥ अश्वेन संचरते॥ अवपरिभ्यः क्रीञः॥ विक्रीणीते॥ शप उपालम्भे॥ विप्राय शपते॰
विप्रं स्पृशामीति शपथं करोतीत्यर्थः॰ अन्यत्र दुष्टः शपति॥ ज्ञाश्रुस्मृदृशां सन्तानाम्॰ जिज्ञासते॥ शुश्रू
षते॰ सुस्मूर्षते॰ दिदृक्षते॥ अनोर्ज्ञानातेर्न॥ अनुजिज्ञाससि पुत्रम्॥ कर्मव्यतिहारे आत्तोरात॰
व्यतिभवते॰ व्यतीवहन्ते॰ वाहिनः॥ न हिंसार्थगत्यर्थपठजल्पहसात्॥ इतरेतरान्योन्यपरस्परोपपदाच्च
न॰ व्य[illegible]तिगच्छन्ति॰ व्यतिघ्नन्ति॰ भुजोऽनवने॰ भुङ्क्ते अन्नम्॰ पालनेतु महीं भुनक्ति नृपः॥ ॥ ॥
इति परव्यवस्था॥ ॥ यक् कर्तृ तीये कर्तृप्रयोगे भवति॰ भावे कर्मणि चतुर्थे तिबादिषु परतः॥ आदु

कोप

विकर्म्मणि· अकर्म्मकाद्भवि सकर्म्मकाच्च कर्म्मणाद्भवति·॥ भावस्यैकत्वात्प्रथमपुरुषस्यैकवच[illegible]नेमेव
भूयते भूयते· भूयताम्· अभूयत· बभूवे· स्वरान्तानांहनग्रहदृशाञ्च भावकर्म्मणोः सिसतासीस्यपाशिड्डास
शिञ्च॥ भाविषिष्ट· भविषिष्ट· भाविता· भविता· भाविष्यते· भविष्यते· अभाविष्यत· अभविष्यत· इ
णान्तस्यकर्त्तरि॥ आतोन्तनिपरे भावेकर्म्मणि च इणप्रत्ययो भवत्यकर्त्तरि· सेरपवादः॥ लोपः॥ इणो
योगेतनो लोपो भवति· अभावि॥ अकर्म्मकोऽपि कश्चित्सकर्म्मकतामुपैति·॥ अनुभवति· सुखमनुभू
यते स्वामिना॥ उक्तञ्च· य कर्म्मगुणसंयोगात्कर्त्तृत्वेन विवक्षते·॥ सकर्म्मक[illegible]र्त्ता· स्मृकैः
गु६ स्वैरा· यस्मात्कर्म्मकर्त्तेति तद्विदुः॥ येकर्म्मनिरपेक्षां क्रियामाहुस्तेऽकर्म्मकाः कर्म्मसापेक्षां क्रिया
माहुस्तेसकर्म्मकाः॥ उक्तञ्च· लज्जासत्तास्थिति जागरणं वृद्धिक्षयभयजीवितमरणम्॥ श
गुः२ यनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्म्मकमाहुः॥२॥ शीङोऽयङ्ये किति [illegible] ·यकिच
परेक्ङिति च· शीङोऽयङ् भवति· शय्यते· शय्यते· शय्यताम्· अशय्यत· शिश्ये· शायिषीष्ट· शायिषीष्ट·

अशायि · अशयिषि · त्वं दुःखी क्रियसे रोगैः वियोगैः ॥ कर्त्ताहं क्रिये · कारिषीष्ट · कृषीष्ट · करिष्यते · का
रिष्यते · अकारि · अकारिषाताम् · अकृषाताम् ॥ चिञ् चयने ॥ चीयते · चिच्ये · चिक्ये · अचायि दीयते ·
ददे ॥ आतो युक् ॥ आदन्ताद्धातो युगागमो भवति चिण्ञिति णिति च परे ॥ दायिषीष्ट · दासीष्ट · अदा
यि · अदायिषाताम् · अदिषाताम् · अस्तावि · अस्ताविषाताम् · अस्तिषाताम् · हन्यते · हन्येते ·
घानिषीष्ट · वधिषीष्ट · अवधि · अघानि · अघानिषाताम् ॥ आतिहनः सिः किद्वाप्यः · अहसाताम् ·
गृह्यते · जगृहे · ग्राहिषीष्ट ॥ न हा मीटः ॥ ग्रहिषीष्ट · अग्राहि · दृश्यते · [illegible] · ददृशे · द
र्शिषीष्ट · दृक्षीष्ट · दर्शिता · द्रष्टा · अदर्शि · अदर्शिषाताम् · अदृक्षाताम् · पच्यते · पेचे · पक्षी
ष्ट · पक्ता · पक्ष्यते · अपाचि · अपक्षाताम् ॥ तनोतेर्यग्वा यकि ॥ तायते · तन्यते · तेने · अतानि · अतनि
षाताम् · शम्यते मुनिना ॥ अन्तस्य · शाम्यते मोहो हरिणा · शम्य · शमयांचक्रे ॥ अचो ञ्णिति
णौ वृद्धिः ॥ अशामि · अशमि · इणावदिष्टे लोपः ॥ अशामिषाताम् · अशमिषाताम् ॥ अर्ध

ते॰स्मारे॰स्मारिषीष्ट॰स्मषीष्ट॰स्मारिता॰स्मर्ता॰स्मारिष्यते॰स्मरिष्यते॰स्मारि॰स्मारिषातां॰स्म
र्षाताम्॰स्मर्ष्यते॰स्मरे॰स्मारिता॰स्मर्ता॰अस्मारि॰अस्मारिषाताम्॰अस्मर्षाताम्॰लूयते॰केदा
रः स्वयमेव॰लुलुवे॰अलावि॰पच्यते॰ओदनः स्वयमेव॰भिद्यते काष्ठं स्वयमेव॥दुहस्नुनमां कर्म
कर्तरि यगिणौ न॰दुग्धे॰स्नुते॰गौः स्वयमेव॰नमते दण्डः स्वयमेव॰अदुग्ध॰अस्नाविष्ट॰स्नुक्र
मोर्नेडाति॰अस्नोष्ट॰अनंस्त॥न्यायो ज्यन्त निः कर्मगत्यर्थामुख्यकर्मणि॰प्रत्य
ये यान्ति दुह्यादि गौणे ण्यन्ते यथानुचिः॥१॥निन्ये विजनमजा गरि रजनीमगाभिमद
मयाचि सभोगाम्॰गोपि हाव मकार्यत भावञ्चेतामनन्तेन॰चिकित्स्यते कटः कातरेण॰बोभुज्यते॰पा
पच्यते॥॥इति भावकर्मणोः प्रकरणम्॥ ॥ [illegible] ।स्मृति वा चिन्त्युपप
दे भूतानद्यतने लृडो ऽपवादः॥स्मरसि [illegible] कृष्ण गोकुले वत्स्यामः एवं बुध्यते। चेत॰ यसे॰इत्या

७८

दियोगेऽपियद्योगे ऽन्कृन्त्म॰ ॥ अभिजानासिकृष्णायरभुञ्जपश्यहि ॥ उत्तमपुरुषेचित्तविक्षेपादि
नापरोक्षत्वम्॰ ॥ सुप्तोऽहंकिलविललाप॰ बहुजगदपुरस्तात्तस्यमत्ताकिलाहम्॰ ॥ अत्यन्तापन्हवेलि
ट्॰ ॥ त्वंकलिङ्गेष्ववात्सीः नाहंकलिङ्गंजगाम॰ ॥ ॥ हशश्वतोर्लङ्॰ ॥ इतिहाकरोत्॰ चकार॰
वा॰ शश्वदकरोच्चकार॰वा॰ ॥ प्रश्नेचासन्नकालेलङ्॰ अगच्छत्किम्॰ जगामकिम्॰ ॥ अनासन्नेकि
म्॰ कंसंजघान॰ ॥ स्मयोगेभूतेलट्॰ ॥ यजतिस्मयुधिष्ठिरः अनद्यतनेच॰ ॥ एवंस्मपिताब्रवीति॰ ॥ ननौ
पृष्ठप्रतिवचनेभूतेलट्॰ ॥ अकार्षीःकिम्॰ ननुकरोमिभोः ॥ नन्वोर्वा॰ अकार्षीःकिम्॰ नकरोमि॰ ना
कार्षम्॰ अहन्नुकरोमि॰ अहन्न्वकार्षम्॰ ॥ पुरियोगेऽनद्यतनेलुङ्लटौ॰ ननुस्मे॰ ॥ वसन्तीहपुराछा
त्राः अवात्सुरवसन्नूषुर्वा॰ ॥ स्मयोगेकिम्॰ ॥ यजतिस्मपुरा॰ यावत्पुरानिपातयोर्भविष्यतिलट्॰
यावद्भुङ्क्ते॰ पुराभुङ्क्ते॰ ॥ निपातावेतौनिश्चयंद्योतयतः ॥ कदाकर्ह्योर्वा॰ ॥ कदाकर्हिवाभुङ्क्ते॰ भोक्ष्यतेभो

वे२

७८

...सिंहं भजे ॥

कृ॰ ५

न्कावा॰ किं व्यक्तो लिप्सायाम्॰ कं कतरं कतमं वा॰ भोजयति॰ भोजयिष्यति॰ भोजयिताशिवा॰ लिप्सायाम् किम्
कः पाटलिपुत्रं गमिष्यति॰ ॥ वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥ कदा आगतोसि॰ अयमागच्छामि॰
अयमागमम्॰ कदा गमिष्यति॰ एष गच्छामि॰ गमिष्यामि वा ॥ क्षिप्रप्रवचने लृट्॰ । उपाध्यायश्चेत् क्षिप्रमा
शुत्वरितं वा यास्यति तत्र शिक्षांब्रुवस्यामः ॥ गर्हायां लडपिजात्वोः॰ कालत्रये॰ अपि जायां त्यजसि॰
जातु गणिकामाधत्से॰ जातु यच्छ दायरि योगे उपि लिं॰ । लटोऽपवादः ॥ जातु यद्यपि दित्वा वदशो
हरिं निन्देत्॰ । नावकल्पयामि न मर्षयामि ॥ हेतुहेतुमतोर्लिङ् ॥ कृष्णं नमेच्चेत्सुखं यायात् ॥
कृष्णं नेस्यति चेत्सुखं यास्यति॰ भविष्यत्येवेष्यते नेह॰ इच्छार्थेषु लिङ्लोटावन्यतरस्याम्॰ इ
च्छामि भुञ्जीत॰ भुङ्क्ताम्॰ कामयान॰ । एवं काम॰ प्रार्थये॰ । हन्त्रयेत्॰ पौनःपुन्ययोर्लोटि हि ॥ पुरीम
व मस्कन्दल्लुनीहि नन्दनं मुष्णाराग [illegible] त्नानि हरामराङ्गनाः विग्रहचक्रेनमुविद्विषावली यइत्थम
स्वास्थ्य महन्निशं दिवः ॥ १ ॥ धातूनां मनन्तत्वान्नानार्थत्वाच्च सर्वेषां ॥ अभिधातुमशक्यत्वाद्दलमा

पृ॰ ३

(९७)

८१

५०

ख्यातविरैः॥ ॥ इत्याख्यातप्रकरणम् ॥ ॥ श्रीनृसिंहो विजयतेतराम् ॥

५०

९७